क्रं.७८

संस्कृत

३४९६ पुराण

॥ अगस्तिविरचितपद्धति ॥

४९०|पृ ४२

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1)

॥ अथ भक्तिविष्णुपदीप्रारंभः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः ॥श्रीशंवंदे॥ विश्वाकारंनिराकारंसच्चित्सुखमनामयं ॥ ब्रह्मधीमहिंविष्णवा
ख्यंब्रह्मधीमहितंहियत् ॥ १ ॥ श्रीशंवंदेतमहंस्वभक्तवांछितसुरद्रुमंनित्यं ॥ अपिसर्वेमंग
लेशाःशंभुर्यंभजातिसंततंभक्त्या ॥२॥ आंहवभूम्यांरम्यांप्रादुर्भूतिंनिजांसमाधत्ती ॥ सीतांरा ६
मपदाब्जेश्रियंवितनुतांसतांभजतां॥३॥परामोदात्मायःसकलसुमनःश्लाघ्यमहिमाघनच्छा
यःसर्वागमफलतयाभातिसततं॥त्रितापान्निःशेषंहरतिपरहंसैश्चसहितःसदारामःशीतान्वित
इहसुखायास्तुभवताम् ॥४॥ वंशीधराकाचनमेवकाऽस्तिसेदेवतासात्द्वदिमेचकास्ति ॥ यां
चस्वनाम्नासकलाघनाशांतयैवभूयात्सफलांघनाशा ॥ ५ ॥ यदंजनाभंवरकंजनाभंधनंज

१. आहवोयुद्धयज्ञयोरितिमेदिनीकरः २. सीतापक्षेस्त्रीलिंगैकवचनं रामपदाब्जपक्षेनपुंसकद्विवचनं ३. सीतापक्षेआत्मने पदैकवचनं रामपदाब्जपक्षेपरस्मैपदद्विवचनं ४. आमोदोगंधहर्षयोरितिमे० ५. रामः आरामश्च ६. शीतानभःसरितिलां गलपद्धतौचशीतादशाननरिपोःसहधर्मिणीच ॥ शीतंस्मृतंहिमगुणेचतदन्वितेचशीतोऽलसेचबहुवाररतौचदृष्टइतिताल्व्यादौधरणिः ॥
७. निबिडाशा

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

याज्ञानतमोवभंज ॥ तद्धामनित्यंबहुधामनोमेचलंविदध्यादचलंपदाब्जे ॥ ६ ॥ आश्रित्य
यंजनोऽयंसफलंप्रकरोतिमानवंदेहम् ॥ तंबोधाप्त्यैभक्त्याश्रीमद्गुरुमेववंदेहम् ॥ ७ ॥ अ
ज्ञानध्वांतहरःप्रबोधकृन्मार्गदर्शीच ॥ रविरपिगुरुस्तुलोकेनंतापदःसन्नतापदोहंति ॥ ८ ॥
गुरुमप्यचलंस्वशिरसिधृत्वासंसारसागरमपारं ॥ अपिपातितःसंसरतिचलघुसंगान्मज्जती
तिगुरुचित्रं ॥९॥ विष्णुपदोद्भूतिमतीशब्दमयीविष्णुभक्तिविष्णुपदी ॥ समुदीर्यतेत्रसरसा
खिलमलहंत्रीचसकलफलदात्री॥१०॥श्रेयःसाधनमेतद्भक्तिर्भावेनभवतियाविष्णौ॥ अंतर्ब
हिरपिपंकंहरतिसदाभातिभक्तिविष्णुपदी ॥ ११ ॥ प्रज्ञानाविज्ञानवतीमदीयाविद्याऽनवद्या
ममकापिनैव ॥ पद्यंनहृद्यंयदिमेतथापिश्राव्यंसुकाव्यंविभुवर्णनेन ॥ १२ ॥ यन्निर्गुणंके
वलमक्षरंात्मविभातिनोदृश्यतएवकैश्चित् ॥ तथैवकाव्यंममभक्तिलुब्धैरालोक्यतेसाधुगु
णंयथास्यात् ॥ १३ ॥ नमेस्तिखेदोविगुणेपिकाव्येगुणस्यलेशोस्तियतोमुरारेः ॥ सएव

---

१. आकाशं हरिचरणंच २. ब्रह्म वर्णाश्च

(3A)

दोषानपहंत्यशेषान्गुणाधिकत्वेनविराजतेच ॥ १४ ॥ लाभस्तेषांसंततंसर्वदिक्षुतेषामेव
स्याज्जयोऽव्याहतश्च ॥ येषांश्रीमानुत्पलश्यामलांगःप्रेम्णाबद्धोमानसेवासुदेवः ॥ १५ ॥
परात्परंपरायणंपुरारिपद्मजार्चितंफणींद्रशायिवस्त्वदोबहुप्रदंबलंसताम् ॥ भवोत्थभी
तिभिद्विषड्मतंमनीषिणामहोपवर्गसंयुतंसदाऽपवर्गदानदक्षिणम् ॥ १६ ॥ अथयुग्मम्
चरन्वेनगाःपरिपालयनयश्छविंमनोज्ञांदधदभ्रनीलां॥जयत्यसंख्यानपिकामदेहानूझरःकृपा
याविबुधाञ्चितांघ्रिः ॥ १७ ॥ सएवसर्वोत्तमएकईशःशक्रारिनाशायशयोद्धृता
रिः ॥ सतांसदारक्षणदीक्षितोऽस्तिकोन्यस्ततोवापरिसेवनीयः ॥ १८ ॥ क्षराक्षराभ्यां
भगवानतीतःसच्चित्सुखात्माऽखिलसत्वरूपः॥सर्वोत्तमोवेदविदांमतोयस्ततोन्यतःस्यादभयं
कुतोवा ॥ १९ ॥ निजंपदंभक्तजनाय केनदत्तंविनाश्रीयदुनायकेन ॥ स्मृतिप्रसन्नं
स्वजनस्यचित्तंपरोकरोत्कोवदजातुचित्तम् ॥ २० ॥ यद्भयचकिताःसर्वेयत्कृपयानि

---

१. शय: हस्त।

(५)

भ० वि० जपदस्थिरादेवाः॥सकलेश्वरःससेव्यःकिंभीतैस्तैःसुरैरन्यैः ॥ २१ ॥ हतेहिरण्येपिन मं० तरं०
कोपशांतिर्यदानृसिंहस्यतदासुरास्ते ॥ पलायितादूरतरंमृगावा[1]सजंबु[2]कोभूद्वरुणस्तुसार्थः ॥
॥२॥ २२ ॥ नकोपवश्योभगवान्मुकुंदःस्वभक्तवात्सल्यरसैकसक्तः ॥ प्रल्हादसंदर्शनमात्रतोयंयतो ॥१॥
भवच्छांततमोमुदात्मा ॥२३॥ किंप्रभुभिर्बहुभिस्तैःसुसेवितैरापिमितप्रदैःसांतैः ॥ इ[3]नमंडल
वर्तीयोऽमरेंद्रवंद्यःसएवसेव्यइनः ॥२४॥ राजानःसंत्वेतेयक्षश्चंद्रस्तथानृपःक्षत्रं ॥ राजा नः
सतुरामोविश्वंयत्सत्तयाभाति ॥२५॥ नियंताखिलानांजगद्धेतुभूतोयतोनोत्तमोनैवभावीन
भूतः ॥प्रकशात्मकोऽतस्तमोनाशहेतुःसकिंसेव्यतेनोविपात्सिंधुसेतुः ॥ २६ ॥ यजंतु
देवान्क्रतुभिश्चसांगैर्व्रजंतुतीर्थान्यपितानितानि ॥ तपांसिभूयांसिसमाचरंतुहरिंपरित्यज्य
तरिंतरेत्कः ॥ २७ ॥ वेदैःक्रियोपास्तिपरैःसमग्रैर्वेदांतवाक्यैर्निजवोधकृद्भिः ॥ संवर्ण्यतेऽ ॥२॥
सौजगदीशएकःसच्चित्सुखात्माहरिरेवसेव्यः ॥ २८ ॥ योविधींद्रमुखदेवमानितःकोपरोवद

१. वाशब्दइवार्थे २. जंबुकौक्रोष्टुवरुणाविस्यमरः ३ इनःपत्यौनृपार्कयोरितिमे०

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(5A)

विभूतिमानि[1]तः ॥ यत्सुदुर्लभतरंसुरा[2]गतस्तंत्प्रयच्छतिनिजायरागतः ॥ २९ ॥ विधीश
शक्राद्यमरैर्निजेष्टलाभाययःसेव्यतएवसर्वैः ॥ अस्मान्मुकुंदात्सदयादधीशान्नास्माननाथा
न्परिपातुमीशः ॥ ३० ॥ यःसर्वहृत्स्थोभगवाननंतोलीलातनुःसाधुजनावनाय ॥ स्वभक्त
वांछामरवृक्षएकःकोन्यस्ततोवापरिसेवनीयः ॥ ३१ ॥ संसारेसंसरणंदुःखकरंसेवयाप्रभोर्ना
स्य ॥ तस्माद्भजनीयोऽसौकारुणिकःशांततमएकः ॥ ३२ ॥ अपुनर्जननायकंभजेत्सुरवं
द्यंयदुनायकंविना ॥ सकलास्वपिदेवतास्वयंभजनीयोभृगुणोदितःस्वयं ॥ ३३ ॥ देवाअ
पिसेवाभिहविष्णोर्वांछंत्यवाप्यमा[3]नवतां ॥ सानवताग्र्यगताप्यतोस्तिकाकथयमूढमानवं
तां ॥ ३४ ॥ अकामतःकश्चनकामतोवाभक्त्याचदंभेनहरिंभजेद्यः ॥ व्रजेत्पुमर्थांश्चतुरःस
जंतुर्हरेर्हिभक्तिर्विफलाक्वचिन्न ॥ ३५ ॥ यस्यांनन्यूनत्वंसासंपच्छ्रीहरेःप्रसादेन ॥ यस्यांन
न्यूनत्वंसाऽसंपच्छ्रीहरेःप्रसादेन ॥ ३६ ॥ स्तन्यस्यमातुर्यदितेनकांक्षासन्यस्यतत्कर्मफला

१. विभूतिमान् इतइतिपदच्छेदः २. कल्पवृक्षात् ३. नरत्वं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

भिलाषं ॥ जन्यस्यविष्णुंजनकंभजाशुधन्यस्यमार्गःप्रथितोयमत्र ॥ ३७ ॥ अधीत्यविद्याः
सकलाःप्रयत्नाद्विचार्यभूयोपिचताःसमस्ताः ॥ सिद्धांतएषोत्रकृतोमुनींद्रैःसेव्यश्चिदानंदव
पुर्मुकुंदः ॥ ३८ ॥ गंगाधराख्यदेवस्यजनस्थाननिवासिनः ॥ कृतां[1]वस्तुतरंगोयंपापतापनि
वारकः ॥ ३९ ॥ इतिश्रीभक्तिविष्णुपद्यांमंगलाचरणनिरूपणंनामप्रथमस्तरंगःसमाप्तः ॥
श्रीगणेशायनमः ॥ अथस्वधर्माचरणनिरूपणम् ॥ वर्णाश्रमाचारपथप्रसक्तःसदाहरिं
योभजतेसभक्तः ॥ स्वयंसमुत्तीर्णभवार्णवःसन्नन्यांश्चसंतारयतीहलोकान् ॥ १ ॥ आ
ज्ञादिवेदाजगदीश्वरस्यवेदोदिताचारममुंभजस्व ॥ आचारहीनंनपुनंतिवेदानदेवतास्तीर्थ
जलानिंवानं ॥ २ गीतासुगीताहरिणास्वयंयेमुमुक्षधर्माःकिलचित्तशुध्यै ॥ यो
नाचरेत्तान्विहितान्पुमान्सभवेद्विगीता[2]चरणोत्रलोके ॥ ३ ॥ यत्स्वीयवर्णाश्रम ॥३॥
धर्मकर्मगुणान्वितंवाविगुणंतथापि ॥ तदेवसन्मानसशुद्धिकारित्यजेन्नधीमांस्ततइष्ट

१, कृतौ अस्त्वित्रिपदच्छेदः २. निंद्याचरणः गीतारहिताचरणश्च,

(5A)

लाभः ॥ ४ ॥ श्रेयान्स्वधर्मोविगुणस्तथापिधर्मात्परस्माद्भयदाद्गुणाढ्यात् ॥
यत्रामयेक्रूतरंनियोज्यंतत्रौषधंकिंमधुरंविधेयं ॥ ५ ॥ ब्रह्मर्षयोवापिनृपर्षयोवाव
सिष्ठमुख्याजनकादयश्च ॥ कर्माणिकृत्वैवनिजोचितानिययुःपदंतद्यमिनांयदिष्टम् ॥ ६ ॥
गृहेवसंतोहरिमर्चयंतःस्वधर्ममेवानिशमाचरंतः ॥ धन्यावदान्याविबुधेषुमान्याभवंत्य
वन्यामिहमानवास्ते ॥ ७ ॥ कृष्णार्पणंकर्मसमाचरन्सन्फलाभिलाषंकुरुमाकदा
पि ॥ भूमौवसन्सात्विकशीलएवनतामसोवाभवराजसश्च ॥ ८ ॥ सत्वेनयोभजोद्वि
ष्णुंयातिसात्विकतामसौ ॥ प्राप्नोतिसपरंधामनैवराजसतामसौ ॥ ९ ॥ कृष्णार्पणंकर्मस
माचरंतःस्वाचारतोलोकमुषादिशंतः ॥ ऋजुस्वभावेनसमुल्लसंतोनोदारतांतेकिमुयंतिसंतः
॥ १० ॥ धर्मैकसंस्थापनहेतुतोत्रजन्मान्यनेकानिबिभर्तिकाले ॥ तस्यप्रियंधर्मविवर्जितःसं
श्चिकीर्षसित्वंवदकिंविमूढ ॥ ११ ॥ आचित्तशुद्धिप्रविहायकामंधर्म्याणिकर्माणिकुरुष्वनि
त्यम् ॥ ततोलभस्वाच्युतसत्प्रसादंभक्तिंविरक्तिंविमलांचमुक्तिम् ॥ १२ ॥ सदाचारविचारा

Joint project of the Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(6)



भ्यांसहितोऽनलसःसुधीः ॥ स्वतेजसादुराधर्षोजायतेनृपवद्भुवि ॥ १३ ॥ आचाराल्लभतेशु
द्धिसिद्धिबुद्धियशोऽपिच ॥ अनाचाराद्भवत्येवताभिस्तेनचवर्जितः ॥ १४ ॥ कर्मणःखलुगर्ह्य
स्यफलंबहुभयावहम् ॥ तथ्यदानदयाधर्मैर्नरत्वंभजकेशवम् ॥ १५ ॥ अयमेवहिसन्मार्गो
हरेःसंतोषकारकः ॥ एतत्समंभवेत्पुण्यंनाध्वराणांशतैरपि ॥ १६ ॥ अध्वरीतिप्रसिद्धो
पिनाध्वरीतिर्मतोबुधैः ॥ साध्वानंदपदंलभ्यंनाध्वराणांशतैरपि ॥१७॥ दुष्कर्मणःपरिणति
र्बृहदुःखदात्रीभुक्तापिभुज्यतइहप्रतिधस्त्रमेषा ॥ कृत्वास्वकर्मनरशर्मदरामभद्रसंतोषका
रकमपुनर्भवमाप्नुहित्वंम् ॥ १८ ॥ अधर्मवंतःकिलभाग्यवंःसुकांतिमंतोनहरिंभजंतः ॥
दीपाइवस्वीयविनाशकालेसमुज्वलंतोऽस्तमिताभवंति ॥ १९ ॥ परंपराप्राप्तममुंप्रसिद्धंस्व
धर्ममेवानिशमाचरन्सन्॥हरिंभजेतात्महितायधीमाँश्छ्रेयोऽयनंशिष्टजनोक्तमेतत्॥ २० ॥
धर्मज्ञानायधर्मज्ञविप्रवर्गःसुसेव्यताम् ॥ यातितस्मात्सएवादौसुधियापरिसेव्यताम् ॥२१॥

१. रीतिःस्त्रियांस्पंदप्रचारयोरितिमेदिनीकरः

(6A)

आचारएवप्रथमःस्वधर्मोव्यासोक्तिरेषाजगतिप्रसिद्धा ॥ तद्बोधलब्ध्यैद्विजवर्यसेवाकार्यासदा
बुद्धिमतानरेण ॥ २२ ॥ यदन्नदानेनसुतृप्तिभाजोदेवाश्चसर्वेपितरोभवंति ॥ व्रतानिकर्मा
ण्यखिलानिसद्यःसंपूर्णतामत्रकिलव्रजंति ॥२३॥ विप्राणांविप्राणामास्योदितमंत्रतोपिपा
षाणाः ॥ तेहरयंतिहरंत्यपिहरंतिदुःखानिददातिसमभीष्टम् ॥२४॥ स्वाचारयुक्ताहरिशंभुभ
क्ताविवेकवंतःसमुपादिशंतः ॥येब्राह्मणावेदविदोमहांतःश्रेयोर्थिभिस्तेपरिसेवनीयाः॥२५॥
अहरहर्निजकर्मसुतत्पराःसुभसितेनमृदालसिताश्चये ॥ हरिहरस्तुतिपाठरताःसदाभजत
तान्विनयाद्भुविभूसुरान् ॥ २३ ॥ एवंस्ववर्णाश्रमधर्मसक्ताहरिंहरंवाभजतैक्यभावात्॥ भ
जंतियेभेदधियात्रकेचिच्चवंतितेतत्वतएवमूढाः ॥२७॥ दृग्दोषेणयथाज्योतिरेकंसत्दृश्यतेद्वि
धा ॥ मोहमत्यातथैवैतौभिन्नौहरिहरौकिल ॥ २८ ॥ श्यामगौरवपुषीसदैवतेप्रेमगौरवपु
षीसुदैवते ॥ येवृषाकपि[3]तयाप्रकीर्तितेप्रत्ययाँदपितयोःस्त्रियौतथा ॥ २९ ॥ नांतरंतुकिलवि

---

१ हरिरिवआचरंति २ हरइवआचरंति ३ शिवविष्णूवृषाकपीत्यमरः ४ विज्ञात् स्त्रीप्रत्ययाच ५ वृषाकपाय्यौश्रीगौर्याविल्यमरः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

 द्यतेतयोर्नांऽतरंयइहमन्यतेकुधीः॥यातिनैवसुगतिंकदाप्यसौयाऽतिरम्यसुखचिन्मयीसती३० 
 परिचरंतिहरिंशिवनिंदकाःपरिचरंतिहरंहरिनिंदकाः ॥ नहितमश्नुवतेवततेनरानहितयोः 
क्वचिदस्तिविभिन्नता॥३१॥यथोचितंकर्मसमाचरन्सन्ननन्यभावेनहरिंहरंवा ॥भजेतधीमान
(७) फभिलाषःपारंसमीयाद्भवसागरस्य ॥ ३२ ॥ गंगाधराख्यदेवस्यजनस्थाननिवासिनः॥कृताव
स्तुतरंगोयंपापतापनिवारकः ॥ ३३॥ इतिश्रीभक्तिविष्णुपद्यांस्वधर्माचरणनिरुपणंनामाद्वि
तीयस्तरंगः ॥ २ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीगणेशायनमः॥अथसत्संगनिरूपणम्॥आदौसज्जनसंगात्कथाहरेरघहाराःसुरसयुक्ताः॥
श्रद्धारतिश्चभक्तिस्ताभिस्तस्मात्सएवसंपाद्यः॥१॥साधुर्यत्रवसेत्तत्रप्रायःश्रीहरिकीर्तनं ॥ ज्ञा
नस्यचविरक्तेश्चबोधोन्योन्यप्रसंगतः ॥ २ ॥ सत्संगतःश्रोत्रमनोभिरामारामस्यवार्ताःसत 
तंभवंति ॥ याभिर्मनःशुद्धिरथोविरक्तिर्भक्तिश्चबोधोनिगमप्रसिद्धः ॥ ३ ॥ गृहेवसंतोपि
हरिंभजंतोभूतानुकंपांभृशमाचरंतः ॥ धन्यावदान्याविबुधेषुमान्याभवंत्यवन्यामिहसेवनी

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A)

याः ॥ ४ ॥ भववनगोपिभवनगोभजतिभृशंवनं[1]जनाभमवनीयः ॥ सदयःसदय[2]ःसंभवतिंसं
भवतिरस्कारमाचरत्यभयः ॥ ५ ॥ साधुःसदैवशृं[3]गीगिरिवरइवसर्वकालगुणसहनः ॥ स[4]
त्वाश्रयोऽचलात्मायस्यगुहा[5]यांनिरंतरंसहरि[6]ः ॥ ६ ॥ यतोखिलात्मापरिपूर्णसंवित्संकीर्त्य
मानोभगवान्स्वभावात् ॥ सेव्यःसदास्याद्भवबंधमुक्त्यैदेशोविविक्त[7]ःसंजनोपिशश्वत् ॥७॥
कामरताभुविभूत्वापामरतांनैवयांतियेसंतः ॥ नामरतामिच्छंत्यपिनामरतां राघवस्यतेसे
व्याः ॥ ८ ॥ स्वसेवकेसर्वधराधिनाथेस्वताडकेवापिचतस्करेवा ॥ नरागविद्वेषयुतःकदा
पिससाधुवर्यःकिलसेवनीयः ॥ ९ ॥ सुसुंदरांगींवनितांपरस्यरहोगतांवासरसांसमीपे ॥
निरीक्ष्यचेतोविकृतिर्नयस्यससाधु० ॥ १० ॥ रामेतिकृष्णेतिवदन्सुहृष्टःप्रेमाश्रुनेत्रःपुल
कान्वितश्च ॥ ममत्वहीनोनिरहंकृतिश्चससाधु० ॥ ११ ॥ आपत्सुखेदंनकरोतियोत्रसंप

---

१ पद्मनाभं २ अयःशुभावहोविधिरित्यमरः ३ शृंगंप्राधान्यसान्वोश्चेत्यमरः ४ गुणः जंतुश्च. ५ बुद्धिः दरीच.
६ विष्णुः सिंहश्च. ७ विविक्तौपूतविजनावित्यमरः

त्सुमागर्वंल्लवंसमश्च ॥ योधीरधीनौंविपरीतताभाक्ससाधु० ॥ १२ ॥ सदास्वभावाद्रघु
नायकस्यगुणप्रशास्तावंतिसक्तियुक्तः ॥ दैवोपलब्धंबहुमानवेद्यंःससाधु० ॥ १३ ॥ यद्वाक्प्र
॥६॥ शस्तारघुनायकस्यगुणप्रशास्तावंनिशंस्वभावात् ॥ देहीतिवक्तुंशिथिलाभवंतीससाधु० ॥३॥
॥ १४ ॥ त्यक्त्वा[1]रांयोभंगुरानूसद्विवेकान्मत्वारामंस्वस्वरूपंसदैव ॥ गच्छेन्नासौरां[2]मरा
(8) वैपरीत्यं[3]श्रेयःकामैःसाधुवर्यःससेव्यः ॥ १५ ॥ सांधौनसाधितातिष्ठेद्विवेकस्यान्वयात्किल॥
सां[6]धौनसाधुतातिष्ठेद्विवेकव्यतिरेकतः ॥ १६ ॥ साधयःसाधवोनैवसाधवोनैवसाधयः॥यव
मात्रविभेदेनदुःखिनोऽन्येसुखात्मकाः ॥ १७ ॥ साधुंतां सां धुर्तायेनसाधितासाधितापुनः॥
तनुंताऽतनुतापस्यनाकिंतस्यासतोभवेत् ॥ १८ ॥ स्वसुखानिरतइहसाधुर्भवतिविमलदृक्स
दाविवेकाढ्यः ॥ संत्यज्यसर्वभूतीर्धत्तेहारिनीलरत्नमेवहृदि ॥ १९ ॥ सोऽकिंचनोभाग्यव ॥६॥

१ अर्थान्. २ रामधनः ३ स्वभावात् शब्दतश्च. ४ सज्जने. ५ पुंस्याधिर्मानसीव्यथेत्यमरः ६ अधिसहिते. ७ सज्जनता. ८ तिरस्कृता. ९ कृशता.

(8A)

तांवरिष्ठस्तस्यार्जनीयंनहिकिंचिदत्र ॥ त्रैलोक्यराज्येननतोषमेतितन्नाशनेनापिनखेदभाक्सन्[1] ॥ २० ॥ यन्महतांहृत्पद्मंदिवानिशंसुप्रसन्नमाभाति ॥ सदिनः[2]सदाचिदात्मामुदाहरि[3]र्नैवमुंचतितत् ॥ २१ ॥ साधौसामोदत्वंरसपूर्णत्वंचजलेजइवभवति[4] ॥ चलतासतृष्णतावामूढेमीनेस्वभावेन ॥ २२ ॥ सत्संगमात्पापपथान्निवृत्तिःसत्संगमाद्धर्मपथप्रवृत्तिः ॥सत्संगमात्स्यात्सदसद्विवेकस्तस्माद्विरक्तिर्भगवत्प्रबोधः ॥ २३ ॥ महत्तमस्तेहृदिसंस्थितंयत्तेनासिदुःखीनितरांनर[5] त्वं ॥ महत्तमश्चेत्प्रणतःपुपृष्टःसंसेवितःसन्सकलंहरेत्तत् ॥ २४ ॥ नंतापकारी[6]सुजनःकदापितस्यैवकुर्यात्सुसमागमंना ॥ नतापकारी कुजनोऽतएवकार्यःसतादृष्टिपथात्सुदूरं ॥ २५ ॥ यत्सेवनंदुर्जननायकस्यंभवेन्नतद्दुर्जननाय कस्य ॥ यत्सेवनंसज्जननायकस्यंभवेन्नतत्सज्जननायकस्य ॥ २६ ॥ कुजनेनसमागमोयदिस्यात्कुमतिस्तर्हिनक

---

१ साधुः २ दिनेनसहितः संश्चासौइनश्च. इनःसूर्यः ३ विष्णुः सूर्यश्च ४ जलेजेइतिपदच्छेदः ५ नरः

६ नतमपकरोतीति.

स्यवाभवेत् ॥ कुमतिर्नचकोनयंविमुंचेन्नयहीनःक्वनगर्ह्यतांव्रजेत् ॥ २७ ॥ कोनयातिक्रमं
कुर्याल्लोकेसज्जनसंगमात् ॥ को न यातिक्रमंमूढोलोकेऽसज्जनसंगमात् ॥ २८ ॥ खंशून्यं
यदपिमतंसुयोगतोजातुतत्सुखंपूर्णं ॥ दुर्योगाद्दुःखमतःसएवहेयोविचारेण ॥ २९ ॥ तत्व
ज्ञानासयेकार्यस्तत्वज्ञानामुपाश्रयः ॥ अज्ञानांसंगतोनस्यादज्ञानांतःकदाचन ॥ ३० ॥ स
त्संगमंसंततमत्रकुर्यान्नश्रीमतावाविदुषाखलेन ॥ शिरस्थरत्नेनविभूषितोपिनकिंभुजंगःप
रिहारणीयः ॥ ३१ ॥ सत्त्राणहेतोर्जगदीश्वरोपिलीलावतारान्शतशोविधत्ते ॥ देहेनसत्सं
गतिलुब्धएवसत्संगमाहात्म्यमनंतमस्ति ॥ ३२ ॥ विश्वात्मनिहरौनित्यंसज्जनःसरसःकि
ल ॥ तस्यसंगतितोनैववैरस्यंस्थितिरुद्भवेत् ॥ ३३ ॥ सरससंगमलाभरतोजनोनकलयेद
पिदुःखमपिक्वचित् ॥ समधुकंजनिषेवणतत्परोनगणयेद्भ्रमरोनिजबंधनं ॥ ३४ ॥ भागवतं

१ रलयोः सावर्ण्यात्क्रमं. २ स्वक्षरयोगतः अथचसुसंगतितः ३ दुर्वर्णयोगतः अथचदुःसंगतितः ४ वैरस्यस्थितिः विरसतास्थितिः अथच वैरस्येतिभिन्नंपदं वैरस्य शात्रवस्य. ५ कमलं

(9A)

चपुराणंपुरुषंतद्वाचकंनिषेवेत ॥ यःसततंतस्यभवेन्मुक्तिःकरगाचभक्तिसुखं ॥ ३५ ॥ यो
जयत्यरिषड्वर्गंनित्यानित्यविवेकधीः ॥ योजयत्यच्युतेभक्तिसाधुरात्मानुभाववित् ॥ ३६ ॥
साधवोदुर्लभास्तेतुमाधवोह्यादियैर्धृतः ॥ समाराधनतोयेषांसमाधिर्मनसोभवेत् ॥ ३७ ॥
भूतानांप्रीतयेसःस्याद्दुर्भिक्षेपातियोधनी ॥ अपिभूतात्मनःसःस्याद्विष्णोःप्रीत्यैचसज्जनः
॥ ३८ ॥ विहायाभिमानंविवेकेनसर्वंसदाश्रीहरिंसेवतेऽनन्यभावात् ॥ सएवाभिजातश्च
साधुःप्रसिद्धोऽद्भुतंनाभिजातोबहुश्लाघतेतम् ॥ ३९ ॥ गंगाधराख्यदेवस्यजनस्थाननिवा
सिनः ॥ कृतावस्तुतरंगोऽयंपापतापनिवारकः ॥ ४० ॥ इतिश्रीभक्तिविष्णुपद्यांसत्संगनि
रूपणंनामतृतीयस्तरंगःसमाप्तिमगमत् ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
श्रीगणेशायनमः ॥ अथवैराग्यनिरूपणम् ॥ येषांमनोनोविषयेषुसक्तंतेषांविभौभक्तिरती
वशुद्धा ॥ वैराग्यमुक्तंहितकृद्बुधैस्तत्तस्याश्रयेसंप्रयतेतधीरः ॥ १ ॥ स्वभावतःस्वार्थपराय

१ अभिजातःकुलीनेस्यात्न्याय्यपंडितयोरपीतिमे० २ ब्रह्मा.

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

णोऽयंकरोतियत्नंस्वसुखायजंतुः ॥ स्वमेवपूर्णसुखमीश्वरंनजानातितस्मादसुखंप्रयाति
॥ २ ॥ सुखायलोकोयततेऽत्रसर्वस्तन्मन्यतेवित्तगृहादिभिःस्यात् ॥ विनश्वरास्तेसकलाः
पदाथोअनश्वरंशर्मकथंप्रदद्युः ॥३॥ धनादिमत्वास्वसुखायदृश्यंतल्लाभयत्नंप्रकरोतिमर्त्यः॥
प्राप्तिस्तुतस्याल्पसुखप्रदात्रीभूत्वालयंयातिततोऽतिदुःखं ॥ ४ ॥ धनार्जनेदुःखमतीवयस्मा
त्तद्रक्षणेतस्यविनाशनेच ॥ पद्मेश्वरंक्लेशहरंमुकुंदंभजस्वभावात्सुररत्नमेकं ॥ ५ ॥ धनार्जनं
क्लेशमतीवसोढ्वाकरोतिसंसारसुखायजंतुः ॥ नमुक्तयेदुःखहरांसुसाध्यांभक्तिमुकुंदस्यविभो
र्दयालोः ॥ ६ ॥ अर्थायमोहात्कुजनायतंतेव्रजंतिसौख्यंकिलनाऽऽयतंते ॥ बुधायतंतेभव
मोक्षणायशश्वत्सुखश्रीहरितोषणाय ॥ ७ ॥ यततेस्वसुखायसज्जनोमनुतेस्वंसुखमव्ययं
हरिं ॥ यततेस्वसुखायदुर्जनोमनुतेस्वंधनमेवनश्वरं ॥ ८ ॥ धनाप्तयेवादिपराजयायकरोषि



तर्कानमितान्किमेतैः ॥ संप्राप्तयेत्वंपरमात्मविष्णोर्गुर्वाश्रितःसन्कुरुसाधुतर्कं ॥ ९ ॥ ऊहः

१ पद्मालक्ष्मीःपयोनिधिश्च. २ विष्णुः निधिश्च.

(10A)

सएवकर्त्तव्योयेनसंतरणंभवेत् ॥ अन्यथामोहएवस्याद्भवसागरमज्जकः ॥ १० ॥ तर्कान्ना
नाविधाँस्त्यक्त्वामातिंसुस्थांहरौकुरु ॥ विद्यायाहिफलंसम्यगेतदाहुर्मनीषिणः ॥ ११ ॥
विद्यांमोक्षपरांप्राहुःपूर्वेसर्वेमनीषिणः ॥ तामेवार्थपरांकृत्वाकथंयास्यसिसद्गतिं ॥ १२ ॥
यत्पावनंश्रीहरिकीर्तनंतद्वेदांतविद्यामपिमुक्तिहेतुं ॥ अर्थायकिंयोजयसीहमूढकःशुक्ति
काप्त्यैवररत्नदःस्यात् ॥ १३ ॥ अर्थार्जनंश्रीहरिकीर्तनेनवेदांतबोधेनकरोषिमोहात् ॥ चिं
तामणिंत्वंविनिमय्यहस्तेगृण्हासिकिंकाचमणिंविमूढ ॥ १४ ॥ संप्राप्यनैगमंज्ञानंयो
जंयत्यर्थलब्धये ॥ वणिग्वृत्तिःसविज्ञेयःपरमार्थंकिमश्नुते ॥ १५ ॥ यदिभवेद्गुरुसे
वनधर्मभाङ्नरहरेश्वरहोभजनेरतः ॥ उपनिषत्परिशीलनमर्थवद्भवतितस्यनरस्यविमु
क्तिकृत् ॥ १६ ॥ योयःप्रारब्धेऽर्थस्तंतंप्राप्नोत्ययत्नतोमनुजः ॥ तत्किंप्रयत्नतस्तंभ्र
मंत्यजश्रीहरिंभजाविमुक्त्यै ॥ १७ ॥ द्रारिद्र्यमेवयदितेकिलभालपट्टेतन्नप्रयातिकृतयत्न

---

१ माऊहः अतर्कः अथचमोहोभ्रांतिः २ निगमोवाणिजेपुर्यांकटेवेदेवणिक्पथइतिमे० ३ धर्मेरहस्युपनिषदित्यमरः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11)

शतैःकदापि ॥ तत्किंवृथाभजासिरेधनिनोमदांधान्श्रीराममेवभजतंसकलेष्टहेतुं ॥ १८ ॥
यस्मिन्नृत्दृषीकदमनंह्यकृतप्रयत्नंनम्रत्वमेवसकलाघविनाशहेतुः ॥ नोदेत्यहंकृतिरनर्थकरी
नरस्यदैन्यंवरंसुतपसोऽत्रानिदानभूतं ॥ १९ ॥ मंन्युंविदधद्बहुधाप्रदीप्तवैश्वांनरश्चदुर्वासाः ॥
सुज्ञस्तुतपोनुमनुतेमुनिरविंमूढस्तपोहीनः ॥ २० ॥ उपवासस्तनुकार्श्यंनक्रोधोनोमदोभवे
द्यस्मिन् ॥ आकिंचन्यंविधितस्तपसोहेतुस्तुसुज्ञस्य ॥ २१ ॥ नरो धनंकांक्षतिभुक्तयेयो नं
रोधनंतन्मनुतेस्वमुक्तेः ॥ नशोधनंयन्मनसोऽत्रजातंनबोधनंतेनधनेनपुंसः ॥ २२ ॥ वर्षंवा
तंचातपमपिसोढ्वासर्वंदैवपाषाणः ॥ न तपःफलंप्रयातिहितद्वदबुद्धिर्दरिद्रोयः ॥ २३ ॥
विद्याधनामानधनाश्चकेचिद्यशोधनाधेनुधनास्तथाऽन्ये ॥ धनानिसर्वाणिपरित्यजंतिसंतःस
दारामधनाभवंति ॥ २४ ॥ धनाढ्योविवेकीभवेन्मानवोयःसदानीतिवित्तोबुधेष्वग्रगण्यः ॥

१ मन्युःपुमान्क्रुधि ॥ दैन्येशोकेचयज्ञेचेतिमे० २ जाठरोऽग्निः ३ कुत्सितवसनः पक्षेदुर्वासाः इतिऋषिनाम

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com